# শ্রীসূর্যসহস্রনামস্তোত্রম্ ১

{॥ শ্রীসূর্যসহস্রনামস্তোত্রম্ ১ ॥}

। অথ ভবিষ্যপুরাণান্তর্গত-সূর্যসহস্রনামস্তোত্রম্ ।

ওঁ বিশ্বজিদ্ বিশ্বজিৎকর্তা বিশ্বাত্মা বিশ্বতোমুখঃ ।

বিশ্বেশ্বরো বিশ্বযোনির্নিযতাত্মা জিতেন্দ্রিযঃ ॥ ১॥

কালাশ্রযঃ কালকর্তা কালহা কালনাশনঃ ।

মহাযোগী মহাবুদ্ধির্মহাত্মা সুমহাবলঃ ॥ ২॥

প্রভুর্বিভুর্ভূতনাথো ভূতাত্মা ভুবনেশ্বরঃ ।

ভূতভব্যো ভাবিতাত্মা ভূতান্তঃকরণঃ শিবঃ ॥ ৩॥

শরণ্যঃ কমলানন্দো নন্দনো নন্দবর্ধনঃ ।

বরেণ্যো বরদো যোগী সুসংযুক্তঃ প্রকাশকঃ ॥ ৪॥

বাক্প্রাণঃ পরমঃ প্রাণঃ প্রীতাত্মা প্রিযতঃ প্রিযঃ ।

নযঃ সহস্রপাত্ সাধুর্দিব্যকুণ্ডলমণ্ডিতঃ ॥ ৫॥

অব্যঙ্গধারী ধীরাত্মা প্রচেতা বাযুবাহনঃ ।

সমাহিতমতির্ধাতা বিধাতা কৃতমঙ্গলঃ ॥ ৬॥

কপর্দী কল্পকৃদ্রুদ্রঃ সুমনা ধর্মবৎসলঃ ।

সমাযুক্তো বিমুক্তাত্মা কৃতাত্মা কৃতিনাংবরঃ ॥ ৭॥

অবিচিন্ত্যবপুঃ শ্রেষ্ঠো মহাযোগী মহেশ্বরঃ ।

কান্তঃ কামাদিরাদিত্যো নিযতাত্মা নিরাকুলঃ ॥ ৮॥

কামঃ কারুণিকঃ কর্তা কমলাকরবোধনঃ ।

সপ্তসপ্তিরচিন্ত্যাত্মা মহাকারুণিকোত্তমঃ ॥ ৯॥

সংজীবনো জীবনাথো জগজ্জীবো জগৎপতিঃ ।

অজযো বিশ্বনিলযঃ সংবিভাগো বৃষধ্বজঃ ॥ ১০॥

বৃষাকপিঃ কল্পকর্তা কল্পান্তকরণো রবিঃ ।

একচক্ররথো মৌনী সুরথো রথিনাংবরঃ ॥ ১১॥

অক্রোধনো রশ্মিমালী তেজোরাশির্বিভাবসুঃ ।

দিব্যকৃদ্ দিনকৃদ্ দেবো দেবদেবো দিবস্পতিঃ ॥ ১২॥

ধীরানাথো হবির্হোতা দিব্যবাহুর্দিবাকরঃ ।

যজ্ঞো যজ্ঞপতিঃ পূষা স্বর্ণরেতাঃ পরাবহঃ ॥ ১৩॥

পরাপরজ্ঞস্ তরণিরংশুমালী মনোহরঃ ।

প্রাজ্ঞঃ প্রজাপতিঃ সূর্যঃ সবিতা বিষ্ণুরংশুমান্ ॥ ১৪॥

সদাগতির্গন্ধবাহুর্বিহিতো বিধিরাশুগঃ ।

পতঙ্গঃ পতগঃ স্থাণুর্বিহঙ্গো বিহগো বরঃ ॥ ১৫॥

হর্যশ্বো হরিতাশ্বশ্চ হরিদশ্বো জগৎপ্রিয়ঃ ।

ত্র্যংবকঃ সর্বদমনো ভাবিতাত্মা ভিষগ্বরঃ ॥ ১৬॥

আলোককৃল্লোকনাথো লোকালোকনমস্কৃতঃ ।

কালঃ কল্পান্তকো বহ্নিস্তপনঃ সম্প্রতাপনঃ ॥ ১৭॥

বিরোচনো বিরূপাক্ষঃ সহস্রাক্ষঃ পুরংদরঃ ।

সহস্ররশ্মির্মিহিরো বিবিধাম্বরভূষণঃ ॥ ১৮॥

খগঃ প্রতর্দনো ধন্যো হযগো বাগ্বিশারদঃ ।

শ্রীমাংশ্চ শিশিরো বাগ্মী শ্রীপতিঃ শ্রীনিকেতনঃ ॥ ১৯॥

শ্রীকণ্ঠঃ শ্রীধরঃ শ্রীমান্ শ্রীনিবাসো বসুপ্রদঃ ।

কামচারো মহামাযো মহেশো বিদিতাশযঃ ॥ ২০॥

তীর্থক্রিযাবান্ সুনযো বিভবো ভক্তবৎসলঃ ।

কীর্তিঃ কীর্তিকরো নিত্যঃ কুণ্ডলী কবচী রথী ॥ ২১॥

হিরণ্যরেতাঃ সপ্তাশ্বঃ প্রযতাত্মা পরংতপঃ ।
বুদ্ধিমান্ অমরশ্রেষ্ঠো রোচিষ্ণুঃ পাতশাসনঃ ॥ ২২॥

সমুদ্রো ধনদো ধাতা মান্ধাতা কশ্মলাপহঃ ।
তমোঘ্নো ধ্বান্তহা বহ্নির্হোতান্তঃকরণো গুহঃ ॥ ২৩॥

পশুমান্ প্রযতানন্দো ভূতেশঃ শ্রীমতাংবরঃ ।
নিত্যোঽদিতো নিত্যরথঃ সুরেশঃ সুরপূজিতঃ ॥ ২৪॥

অজিতো বিজযো জেতা জঙ্গমস্থাবরাত্মকঃ ।
জীবানন্দো নিত্যকামী বিজেতা বিজযপ্রদঃ ॥ ২৫॥

পর্জন্যোঽগ্নিঃ স্থিতিস্থেযঃ স্থবিরোঽণুর্নিরঞ্জনঃ ।
প্রদ্যোতনো রথারূঢঃ সর্বলোকপ্রকাশকঃ ॥ ২৬॥

ধ্রুবো মেধী মহাবীর্যো হংসঃ সংসারতারকঃ ।
সৃষ্টিকর্তা ক্রিযাহেতুর্মার্তণ্ডো মরুতাংপতিঃ ॥ ২৭॥

মরুত্বান্ দহনঃ স্পষ্টা ভগো ভাগ্যোঽর্যমাপতিঃ ।
বরুণাংশো জগন্নাথঃ কৃতকৃত্যঃ সুলোচনঃ ॥ ২৮॥

বিবস্বান্ ভানুমান্ কার্যকারণং তেজসাংনিধিঃ ।

অসঙ্গবামী তিগ্মাংশুর্ধর্মাদির্দীপ্তদীধিতিঃ ॥ ২৯॥

সহস্রদীধিতির্ভগ্নঃ সহস্রাংশুর্দিবাকরঃ ।

গভস্তিমান্ দীধিতিমান্ স্রগ্বিমান্ অতুলদ্যুতিঃ ॥ ৩০॥

ভাস্করঃ সুরকার্যজ্ঞঃ সর্বজ্ঞস্ তীক্ষ্ণদীধিতিঃ ।

সুরজ্যেষ্ঠঃ সুরপতির্বহুজ্ঞোবচসাংপতিঃ ॥ ৩১ ॥

তেজোনিধির্বৃহত্তেজা বৃহৎকীর্তির্বৃহস্পতিঃ ।

অহিমানূর্জিতো ধীমান্ আমুক্তঃ কীর্তিবর্ধনঃ ॥ ৩২ ॥

মহাবৈদ্যাগ্রেণপতির্গণেশো গণনাযকঃ ।

তীব্রপ্রতাপনস্ তাপী তাপনো বিশ্বতাপনঃ ॥ ৩৩॥

কার্তস্বরো হৃষীকেশঃ পদ্মানন্দোঽভিনন্দিতঃ ।

পদ্মনাভোঽমৃতাহারঃ স্থিতিমান্ কেতুমান্ নভঃ ॥ ৩৪ ॥

অনাদ্যন্তোঽচ্যুতো বিশ্বো বিশ্বামিত্রো ঘৃণী বিরাট্ ।

আমুক্তঃ কবচী বাগ্মী কঞ্চুকী বিশ্বভাবনঃ ॥ ৩৫॥

অনিমিত্তগতিঃ শ্রেষ্ঠঃ শরণ্যঃ সর্বতোমুখঃ ।

বিগাহীরেণুরসহঃ সমাযুক্তঃ সমাহিতঃ ॥ ৩৬॥

ধর্মকেতুর্ধর্মরতিঃ সংহর্তা সংযমোযমঃ ।

প্রণতার্তিহরো বাদী সিদ্ধকার্যো জনেশ্বরঃ ॥ ৩৭॥

নভো বিগাহনঃ সত্যঃ স্থামসঃ সুমনো হরঃ ।

হারী হরির্হরো বায়ুরৃতুঃ কালানলদ্যুতিঃ ॥ ৩৮॥

সুখসেব্যো মহাতেজা জগতামন্তকারণম্ ।

মহেন্দ্রো বিষ্টুতঃ স্তোত্রং স্তুতিহেতুঃ প্রভাকরঃ ॥ ৩৯॥

সহস্রকল আয়ুষ্মান্ অরোষঃ সুখদঃ সুখী ।

ব্যাধিহা সুখদঃ সৌখ্যং কল্যাণঃ কল্পিনাংবরঃ ॥ ৪০॥

আরোগ্যকর্মণাং সিদ্ধিবৃদ্ধিরবৃদ্ধিরহস্পতিঃ ।

হিরণ্যরেতা আরোগ্যং বিদ্বান্ বন্ধুর্বুধো মহান্ ॥ ৪১॥

প্রণবান্ ধৃতিমান্ ধর্মো ধর্মকর্তা রুচিপ্রদঃ ।

সর্বপ্রিয়ঃ সর্বসহঃ সর্বশত্রুনিবারুণঃ ॥ ৪২॥

প্রাংশুর্বিদ্যোতনো দ্যোতঃ সহস্রকিরণঃ কৃতিঃ ।

কেযূরভূষণোদ্ভাসী ভাসিতো ভাসনোঽনলঃ ॥ ৪৩॥

শরণ্যার্তিহরো হোতা খদ্যোতঃ খগসত্তমঃ ।

সর্বদ্যোতোঽমবদ্দ্যোতঃ সর্বদ্যুতিকরোঽমলঃ ॥ ৪৪॥

কল্যাণঃ কল্যাণকরঃ কল্পঃ কল্পকরঃ কবিঃ ।

কল্যাণকৃত্ কল্পবপুঃ সর্বকল্যাণভাজনঃ ॥ ৪৫॥

শান্তিপ্রিয়ঃ প্রসন্নাত্মা প্রশান্তঃ প্রশমপ্রিয়ঃ ।

উদারকর্মা সুনয়ঃ সুবর্চা বর্চসোজ্জ্বলঃ ॥ ৪৬॥

বর্চস্বী বর্চসামীশস্ ত্রৈলোক্যেশো বশানুগঃ ।

তেজস্বী সুযশাবর্ণির্বর্ণাধ্যক্ষো বলিপ্রিয়ঃ ॥ ৪৭॥

যশস্বী বেদনিলযস্ তেজস্বী প্রকৃতিস্থিতঃ ।

আকাশগঃ শীঘ্রগতিরাশুগঃ শ্রুতিমান্ খগঃ ॥ ৪৮॥

গোপতির্গ্রহদেবেশো গোমান্ একঃ প্রভঞ্জনঃ ।

জনিতাপ্রজগণ্ডীবো দীপঃ সর্বপ্রকাশকঃ ॥ ৪৯॥

কর্মসাক্ষী যোগনিত্যো নভস্বান্ অসুরান্তকঃ ।

রক্ষোঘ্নো বিঘ্নশমনঃ কিরীটী সুমনঃপ্রিয়ঃ ॥ ৫০॥

মরীচিমালী সুমতিঃ কৃতাতিথ্যোঽবিশেষতঃ ।

শিষ্টাচারঃ শুভাকারঃ স্বাচারা চারতৎপরঃ ॥ ৫১॥

মন্দারো মাঠরো রেণুঃ ক্ষোভণঃ পক্ষিণাঙ্গুরুঃ ।

স্ববিশিষ্টো বিশিষ্টাত্মা বিধেযো জ্ঞানশোভনঃ ॥ ৫২ ॥

মহাশ্বেতা প্রিযো জ্ঞেযঃ সামগো মোদদাযকঃ ।

সর্ববেদপ্রগীতাত্মা সর্ববেদো গযালযঃ ॥ ৫৩॥

বেদমূর্তিশ্চতুর্বেদো বেদভৃদ্ বেদপারগঃ ।

ক্রিযাবান্ অতিরোচিষ্ণুর্বরীযাংশ্চ বরপ্রদঃ ॥ ৫৪ ॥

ব্রতধারী ব্রতধরো লোকবন্ধুরলংকৃতঃ ।

অলংকারাক্ষরো দিব্যবিদ্যাবান্ বিদিতাশযঃ ॥ ৫৫ ॥

অকারো ভূষণো ভূষ্যো ভূষ্ণুর্ভবনপূজিতঃ ।

চক্রপাণির্বজ্রধরঃ সুবেশো লোকবৎসলঃ ॥ ৫৬॥

রাজ্ঞীপতির্মহাবাহুঃ প্রকৃতির্বিকৃতির্গুণঃ ।

অন্ধকারাপহঃ শ্রেষ্ঠো যুগাবর্তো যুগাদিকৃত্ ॥ ৫৭ ॥

অপ্রমেযঃ সদাযোগী নিরহংকার ঈশ্বরঃ ।

শুভপ্রদঃ শুভশোভা শুভকর্মা শুভাস্পদঃ ॥ ৫৮ ॥

সত্যবান্ ধৃতিমান্ অর্চ্যো হ্যকারো বৃদ্ধিদোঽনলঃ ।

বলভৃদ্ বলগো বন্ধুর্বলবান্ হরিণাংবরঃ ॥ ৫৯॥

অনঙ্গোঽনাগরাণিন্দ্রঃ পদ্মযোনির্গণেশ্বরঃ ।

সংবৎসর ঋতুর্নেতা কালচক্রপ্রবর্তকঃ ॥ ৬০॥

পদ্মেক্ষরঃ পদ্মযোনিঃ প্রভবোঽনসরদ্যুতিঃ ।

সুমূর্তিঃ সুমতিঃ সোমো গোবিন্দো জগদাদিজঃ ॥ ৬১॥

পীতবাসাঃ কৃষ্ণবাসা দিগ্বাসাতীন্দ্রিযো হরিঃ ।

অতীন্দ্রোঽনেকরূপাত্মা স্কন্দঃ পরপুরংজযঃ ॥ ৬২॥

শক্তিমান্ সূরধৃগ্ ভাস্বান্ মোক্ষহেতুরযোনিজঃ ।

সর্বদর্শোঽদিতো দর্শো দুঃস্বপ্নাশুভনাশনঃ ॥ ৬৩॥

মাঙ্গল্যকর্তা করণির্বেগবান্ কশ্মলাপহঃ ।

স্পষ্টাক্ষরো মহামন্ত্রো বিশাখো যজনপ্রিযঃ ॥ ৬৪॥

বিশ্বকর্মা মহাশক্তির্জ্যোতিরীশবিহংগমঃ ।

বিচক্ষণো দক্ষ ইন্দ্রঃ প্রত্যূহঃ প্রিযদর্শনঃ ॥ ৬৫॥

অশ্বিনৌ বেদনিলযো বেদবিদ্ বিদিতাশযঃ ।

প্রভাকরো জিতরিপুঃ সুজনোঽরুণসারথিঃ ॥ ৬৬॥

কুবেরসুরথঃ স্কন্দো মহিতোঽভিহিতো গুহঃ ।

গ্রহরাজো গ্রহপতির্গ্রহনক্ষত্রমণ্ডনঃ ॥ ৬৭॥

ভাস্করঃ সততানন্দো নন্দনো নন্দিবর্ধনঃ ।

মঙ্গলোঽপ্যথ মঙ্গলবান্ মাঙ্গল্যোঽমঙ্গলাপহঃ ॥ ৬৮॥

মঙ্গলাচারচরিতঃ শীর্ণঃ সর্বব্রতো ব্রতী ।

চতুর্মুখঃ পদ্মমালী পূতাত্মা প্রণতার্তিহা ॥ ৬৯॥

অকিঞ্চনঃ সত্যসন্ধো নির্গুণো গুণবান্ গুণী ।

সম্পূর্ণঃ পুণ্ডরীকাক্ষো বিধেযো যোগতৎপরঃ ॥ ৭০॥

সহস্রাংশুঃ ক্রতুপতিঃ সর্বস্বং সুমতিঃ সুবাক্ ।

সুভামনো মাল্যদামা ঘৃতাহারো হরিপ্রিযঃ ॥ ৭১॥

ব্রহ্মপ্রচেতা প্রথিতঃ প্রতীতাত্মা স্থিরাত্মকঃ ।

শতবিন্দুঃ শতমখো গরীযান্ অনলপ্রভুঃ ॥ ৭২॥

ধীরো মহত্তরো ধন্যঃ পুরুষঃ পুরুষোত্তমঃ ।

বিদ্যাধরাধিরাজোঽহিবিদ্যাবান্ ভূতিদস্থিতঃ ॥৭৩॥

অনির্দেশ্যবপুঃ শ্রীমান্ বিশ্বাত্মা বহুমঙ্গলঃ ।

সুস্থিতঃ সুরথঃ স্বর্ণো মোক্ষাধারনিকেতনঃ ॥ ৭৪॥

নির্দ্বন্দ্বো দ্বন্দ্বহা সর্গঃ সর্বগঃ সম্প্রকাশয়ঃ ।

দয়ালুঃ সূক্ষ্মধীঃ শান্তিঃ ক্ষেমাক্ষেমস্থিতিপ্রিয়ঃ ॥ ৭৫॥

ভূতরো ভূপতির্বক্তা পবিত্রাত্মা ত্রিলোচনঃ ।

মহাবরাহঃ প্রিয়কৃদ্ ধাতা ভোক্তাভয়প্রদঃ ॥ ৭৬॥

চতুর্বেদধরো নিত্যো বিনিদ্রো বিবিধাশনঃ ।

চক্রবর্তী ধৃতিকরঃ সম্পূর্ণোঽথ মহেশ্বরঃ ॥ ৭৭॥

বিচিত্ররথ একাকী সপ্তসপ্তিঃ পরাৎপরঃ ।

সর্বোদধিস্থিতিকরঃ স্থিতিস্থেয়ঃ স্থিতিপ্রিয়ঃ ॥ ৭৮॥

নিষ্কলঃ পুষ্করনিভো বসুমান্ বাসবপ্রিয়ঃ ।

বসুমান্ বাসবস্বামী বসুরাতা বসুপ্রদঃ ॥ ৭৯॥

বলবান্ জ্ঞানবাংস্তত্ত্বম্ ওংকারস্ ত্রিষুসংস্থিতঃ ।

সংকল্পযোনির্দিনকৃদ্ ভগবান্ কারণাবহঃ ॥ ৮০॥

নীলকণ্ঠো ধনাধ্যক্ষশ্চতুর্বেদপ্রিয়ংবদঃ ।

বষটকারো হুতং হোতা স্বাহাকারো হুতাহুতিঃ ॥ ৮১॥

জনার্দনো জনানন্দো নরো নারাযণোঽম্বুদঃ ।
স্বর্ণাঙ্গক্ষপণো বাযুঃ সুরা সুরনমস্কৃতঃ ॥ ৮২॥

বিগ্রহো বিমলো বিন্দুর্বিশোকো বিমলদ্যুতিঃ ।
দ্যোতিতো দ্যোতনো বিদ্বান্ বিবিদ্বান্ বরদো বলী ॥ ৮৩॥

ধর্মযোনির্মহামোহো বিষ্ণুভ্রাতা সনাতনঃ ।
সাবিত্রীভাবিতো রাজা বিসৃতো বিঘৃণী বিরাট্ ॥ ৮৪॥

সপ্তার্চিঃ সপ্ততুরগঃ সপ্তলোকনমস্কৃতঃ ।
সম্পন্নোঽথ জগন্নাথঃ সুমনাঃ শোভনপ্রিযঃ ॥ ৮৫॥

সর্বাত্মা সর্বকৃত্ সৃষ্টিঃ সপ্তিমান্ সপ্তমীপ্রিযঃ ।
সুমেধা মাধবো মেধ্যো মেধাবী মধুসূদনঃ ॥ ৮৬॥

অঙ্গিরা গতিকালজ্ঞো ধূমকেতুসুকেতনঃ ।
সুখী সুখপ্রদঃ সৌখ্যং কামী কান্তিপ্রিযো মুনিঃ ॥ ৮৭॥

সংতাপনঃ সংতপন আতপী তপসাংপতিঃ ।
উগ্রশ্রবা সহস্রোস্রঃ প্রিযঙ্কারো প্রিযঙ্করঃ ॥ ৮৮॥

প্রীতো বিমন্যুরম্ভোদো জীবনো জগতাংপতিঃ ।

জগৎপিতা প্রীতমনাঃ সর্বঃ শর্বো গুহাবলঃ ॥ ৮৯॥

সর্বগো জগদানন্দো জগন্নেতা সুরারিহা ।

শ্রেযঃ শ্রেযস্করো জ্যাযানুত্তমোত্তম উত্তমঃ ॥ ৯০॥

উত্তমোঽথ মহামেরুর্ধারণো ধরণীধরঃ ।

ধারাধরো ধর্মরাজো ধর্মাধর্মপ্রবর্তকঃ ॥ ৯১॥

রথাধ্যক্ষো রথপতিস্ ত্বরমাণোঽমিতানলঃ ।

উত্তরোঽনুত্তরস্ তাপী তারাপতিরপাংপতিঃ ॥ ৯২॥

পুণ্যসংকীর্তনঃ পুণ্যো হেতুর্লোকত্রযাশ্রযঃ ।

স্বর্ভানুর্বিহগারিষ্টো বিশিষ্টোৎকৃষ্টকর্মকৃত্ ॥ ৯৩॥

ব্যাধিপ্রণাশনঃ ক্ষেমঃ শূরঃ সর্বজিতাম্বরঃ ।

একনাথো রথাধীশঃ শনৈশ্চরপিতাসিতঃ ॥ ৯৪॥

বৈবস্বতগুরুর্মৃত্যুর্ধর্মনিত্যো মহাব্রতঃ ।

প্রলম্বহারঃ সংচারী প্রদ্যোতো দ্যোতিতোঽনলঃ ॥ ৯৫॥

সংতানকৃত্ পরো মন্ত্রো মন্ত্রমূর্তির্মহাবলঃ ।

শ্রেষ্ঠাত্মা সুপ্রিযঃ শম্ভুর্মহতামীশ্বরেশ্বরঃ ॥ ৯৬॥

সংসারগতিবিচ্ছেতা সংসারার্ণবতারকঃ ।

সপ্তজিহ্বঃ সহস্রার্চী রত্নগর্ভোঽপরাজিতঃ ॥ ৯৭॥

ধর্মকেতুরমেযাত্মা ধর্মাধর্মবরপ্রদঃ ।

লোকসাক্ষী লোকগুরুর্লোকেশশ্ ছন্দবাহনঃ ॥ ৯৮॥

ধর্মরূপঃ সূক্ষ্মবাযুর্ধনুষ্পাণির্ধনুর্ধরঃ ।

পিনাকধৃন্ মহোৎসাহো নৈকমাযো মহাশনঃ ॥ ৯৯॥

বারঃ শক্তিমতাংশ্রেষ্ঠঃ সর্বশস্ত্রভৃতাংবরঃ ।

জ্ঞানগম্যো দুরারাধ্যো লোহিতাঙ্গোঽরিমর্দনঃ ॥ ১০০॥

অনন্তো ধর্মদো নিত্যো ধর্মকৃচ্চিত্ ত্রিবিক্রমঃ ।

দৈবত্রস্ ত্র্যক্ষরো মধ্যো নীলাঙ্গো নীললোহিতঃ ॥ ১০১॥

একোঽনেকস্ ত্রযীব্যাসঃ সবিতা সমিতিঞ্জযঃ ।

শার্ঙ্গধন্বানলো ভীমঃ সর্বপ্রহরণাযুধঃ ॥ ১০২॥

পরমেষ্ঠী পরংজ্যোতির্নাকপালী দিবস্পতিঃ ।

বদান্যো বাসুকির্বৈদ্য আত্রেযোঽতিপরাক্রমঃ ॥ ১০৩॥

দ্বাপরঃ পরমোদারঃ পরমব্রহ্মচর্যবান্ ।

উদ্দীপ্তবেষো মুকুটী পদ্মহস্তোঽহিমাংশুভৃত্ ॥ ১০৪॥

স্মিতঃ প্রসন্নবদনঃ পদ্মোদরনিভাননঃ ।

সায়ংদিবা দিব্যবপুরনির্দেশ্যো মহারথঃ ॥ ১০৫॥

মহারথো মহানীশঃ শেষঃ সত্ত্বরজস্তমঃ ।

ধৃতাতপত্রঃ প্রতিমো বিমর্শী নির্ণযস্থিতঃ ॥ ১০৬॥

অহিংসকঃ শুদ্ধমতিরদ্বিতীযো বিমর্দনঃ ।

সর্বদো ধনদো মোক্ষো বিহারী বহুদাযকঃ ॥ ১০৭॥

গ্রহনাথো গ্রহপতির্গ্রহেশস্ তিমিরাপহঃ ।

মনো হরবপুঃ শুভ্রঃ শোভনঃ সুপ্রভাননঃ ॥ ১০৮॥

সুপ্রভঃ সুপ্রভাকারঃ সুনেত্রো নিক্ষুভাপতিঃ ।

রাজ্ঞীপ্রিযঃ শব্দকরো গ্রহেশস্ তিমিরাপহঃ ॥ ১০৯॥

সৈংহিকেযরিপুর্দেবো বরদো বরনাযকঃ ।

চতুর্ভুজো মহাযোগী যোগীশ্বরপতিস্ তথা ॥ ১১০॥

অনাদিরূপোঽদিতিজো রত্নকান্তিঃ প্রভামযঃ ।

জগৎপ্রদীপো বিস্তীর্ণো মহাবিস্তীর্ণমণ্ডলঃ ॥ ১১১॥

একচক্ররথঃ স্বর্ণরথঃ স্বর্ণশরীরধৃক্ ।
নিরালম্বো গগনরো ধর্মকর্মপ্রভাবকৃত্ ॥ ১১২॥

ধর্মাত্মা কর্মণাংসাক্ষী প্রত্যক্ষঃ পরমেশ্বরঃ ।
মেরুসেবী সুমেধাবী মেরুরক্ষাকরো মহান্ ॥ ১১৩॥

আধারভূকো রতিমাংস্তথা চ ধনধান্যকৃত্ ।
পাপসংতাপসংহর্তা মনোবাংছিতদাযকঃ ॥ ১১৪॥

লোকহর্তা রাজ্যদাযী রমণীযগুণোঽনৃণী ।
কালত্রযানন্তরূপো মুনিবৃন্দনমস্কৃতঃ ॥ ১১৫॥

সংধ্যারাগকরঃ সিদ্ধঃ সংধ্যাবন্দনবন্দিতঃ ।
সাম্রাজ্যদাননিরতঃ সমারাধনতোষবান্ ॥ ১১৬॥

ভক্তদুঃখক্ষযকরো ভবসাগরতারকঃ ।
ভযাপহর্তা ভগবান্ অপ্রমেযপরাক্রমঃ ॥ ১১৭॥

মনুস্বামী মনুপতির্মান্যো মন্বন্তরাধিপঃ ॥ ১১৮॥

॥ ইতি শ্রী ভবিষ্যে মহাপুরাণে সূর্যসহস্রনাম স্তোত্রং সম্পূর্ণম্

Stotram Digitalized By Sanskritdocuments.org

||

Encoded and proofread by Kirk Wortman kirkwort@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Surya Sahasranama Stotram Lyrics in Bengali PDF
% File name : suuryasahasraBhaviShya.itx
% Category : sahasranAma
% Location : doc_z_misc_navagraha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Kirk Wortman kirkwort at hotmail.com
% Proofread by : Kirk Wortman kirkwort at hotmail.com
% Description-comments : This one is from bhaviShyapuraaNa
% Latest update : January 31, 2003
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website